दिनाङ्क :- 21.07.2025

प्रात: - 06:55

## मानसूनसत्रम्-संसत्

संसदस्य मानसूनसत्रम् अद्य आरप्स्यते । मानसूनसत्रं अगस्तमासस्य एकविंशति-दिनाङ्कपर्यन्तं भविष्यति । अधिवेशनकाले द्वयोः सदनयोः आहत्य एकविंशतिः अधिवेशनानि भविष्यन्ति । अवधेयमस्ति यत्, आपरेशन् सिन्दूराभियानस्य अनन्तरम् एतत् संसदस्य प्रथमं सत्रं वर्तते । अस्मिन् अवसरे जन-विश्वास-विधेयकं-विंशति-पञ्चविंशतिः, राष्ट्रियक्रीडाशासनविधेयकं-विंशति-पञ्चविंशतिः, आयकर-विधेयकं-विंशति-पञ्चविंशतिः, इत्यादिभिः सह महत्त्वपूर्णविधेयकानि चर्चायै पारितार्थं च उपस्थापयितुं शक्यन्ते । सर्वकारेण स्पष्टीकृतम् यत् सत्रावसरे सर्वकारः महत्त्वपूर्णविषयाणां चर्चायै सिद्धः वर्तते ।

संसदस्य मानसूनसत्रे द्वयोः सदनयोः सुचारुरूपेण कार्यं सुनिश्चेतुं, सत्रात् पूर्वम्, ह्यः सर्वकारेण सर्वपक्षीयसंगोष्ठी कृता । सत्रस्य सुचारुरूपेण संचालनार्थं विपक्षदलेभ्यः सहकार्यं प्राप्तुं सर्वकारेण एषा सभा आहूता आसीत् । लोकसभा-राज्यसभायाः प्रतिनिधित्वं कुर्वन्तः विभिन्नराजनैतिकदलानां दलनेतारः सभायां उपस्थिताः आसन्। सभायाः अनन्तरं वार्ताहरैः सह भाषणं कुर्वन् संसदीयकार्याणां मन्त्री किरेन् रिजिजुः अवदत् यत्, सभा अतीव रचनात्मका आसीत् तथा च दलनेतारः स्वपक्षस्य स्थितिं, अस्मिन् सत्रे यान् विषयान् ते उत्थापयितुम् इच्छन्ति तान् च प्रस्तुतवन्तः।

## मानसून सत्र -बिहार विधानसभा:

बिहार-विधानसभायाः मानसून-सत्रम् अद्य आरप्स्यते । पञ्चदिवसीयसत्रं जुलाईमासस्य पञ्चविंशति-दिनाङ्कपर्यन्तं भविष्यति। अस्मिन् वर्षे अक्टोबर्-नवम्बरमासयोः विधानसभानिर्वाचनं भविष्यति इति कारणतः मानसूनसत्रं राज्यसभायाः अन्तिमसत्रं भविष्यति। संसदीयकार्याणां मन्त्री विजयकुमारचौधरी उक्तवान् यत्, विपक्षेण उत्थापितस्य प्रत्येकस्य विषयस्य प्रतिक्रियां दातुं सर्वकारः पूर्णतया सज्जः ।

## गोवा विधानसभा :

गोवा विधानसभायाः मानसून-सत्रमपि अद्य आरभ्य, अगस्तमासस्य अष्टम-दिनाङ्कपर्यन्तं निरन्तरं प्रचलति । सत्रं महत्त्वपूर्णं भविष्यति, यत्र शासनं, विकासं, जनकल्याणं च इत्यादिभिः सम्बद्धाः प्रमुखाः विषयाः व्यापकरूपेण चर्चायै उत्थापयितुं शक्यन्ते । सर्वकारः विधानसभायां षोडश-विधेयकानाम् प्रस्तावं करिष्यति, अन्य पञ्चदश-निजीसदस्यानां प्रस्ताव-विषये अपि चर्चा भविष्यति।

प्रधानमन्त्री नरेन्द्रमोदी

प्रधानमन्त्री नरेन्द्रमोदी बुधवासरात् ब्रिटेन देशस्य मालदीवस्य च द्वयोः राष्ट्रयोः यात्रां करिष्यति। यात्रायाः प्रथमे चरणे प्रधानमन्त्री जुलाईमासस्य त्रयोविंशति दिनाङ्कात् चतुर्विंशति दिनाङ्कपर्यन्तं ब्रिटेन-देशस्य समकक्षस्य कीर् स्टारमर इत्यस्य आमन्त्रणे ब्रिटेन-देशं गमिष्यति । अस्मिन् भ्रमणावधौ प्रधानमन्त्री मोदी भारत-ब्रिटेन-द्विपक्षीयसम्बन्धानां सम्पूर्णपरिधिविषये प्रधानमन्त्रिणा स्टारमर इत्यनेन सह विस्तृतविमर्शं करिष्यति। निज-यात्रायाः द्वितीये चरणे प्रधानमन्त्री मोदी अस्य मासस्य पञ्चविंशति दिनाङ्कात् मालदीवस्य राष्ट्रपतिः डॉ. मोहम्मद मुइज्जु इत्यस्य आमन्त्रणे द्विदिवसात्मके मालदीव-यात्रायां भविष्यति । सः मालदीवस्य स्वातन्त्र्यस्य षष्ठीवर्षस्योत्सवे ' मुख्यातिथिः' भविष्यति । अस्मिन् अवधौ सः मालदीवस्य राष्ट्रपतिना सह मिलित्वा परस्पर-हितानां विषयेषु चर्चां करिष्यति ।

कावडयात्रा-

काँवडयात्रायाः अन्तिमचरणं प्रचलतीत्यतः बहुसंख्याकाः काँवडयात्रिकाः हरिद्वारं प्राप्ताः सन्ति, यत्र शिवभक्ताः भगवते शिवाय अर्पणार्थं पवित्रगङ्गजलस्य संग्रहं कृत्वा शीघ्रं प्रत्यागच्छन्ति । प्रफुल्लितजनसमूहस्य प्रबन्धनार्थं आरक्षिबलैः यातायातयोजना कार्यान्विता अस्ति । एतावता द्वि दशमलव पञ्च कोटिभ्यः अधिकाः कांवडयात्रिकाः पवित्रगंगाजलेन सह स्वगन्तव्यस्थानानि प्रति प्रस्थिताः सन्ति ।

क्रीडा

जार्जिया देशस्य बटुमि इत्यत्र प्रचाल्यमानायाम् (FIDE) एफ्.आई.डी.ई. महिला-चतुरंग-विश्व-चषक-क्रीडायां भारतीय क्रीडिका कोनेरू हम्पी उपान्त्यचक्रं प्रविश्यमाना प्रथमा भारतीयमहिला अभवत् । तत्पूर्वं हम्पी, चैना देशस्य सोंग-युक्सिन् इत्याख्यां पराजित्य उपान्त्यचक्रं प्रविष्टवती ।